## वृकाट् टेण्यण् । (११७/२०६८)

आयुधजीविसङ्घात् इति वर्तते । वृकशब्दात् [1]आयुधजीविनः स्वार्थे टेण्यण् प्रत्ययो भवति । टकारो ङीबर्थो, णकारो वृद्ध्यर्थः । वार्केण्यः, वार्केण्यौ, वृकाः[2] । [3]आयुधजीविसङ्घविशेषणं,[4] जातिशब्दान् मा भूत् । कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ॥

## दामन्यादित्रिगर्तषष्ठाच्छः । (११६/२०६९)

आयुधजीविसङ्घात् इति वर्तते । दामन्यादिभ्यः प्रातिपदिकेभ्यः त्रिगर्तषष्ठेभ्यः च आयुधजीविसङ्घवाचिभ्यः स्वार्थे छः प्रत्ययो भवति । येषामायुधजीविनां सङ्घानां षडन्तवर्गास्तेषां [5]च त्रिगर्तः षष्ठः । त्रिगर्तः षष्ठो येषां ते त्रिगर्तषष्ठाः इत्युच्यन्ते । तेषु चेयं स्मृतिः --

आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
क्रौष्टकिर्जालमानिश्च ब्राह्मगुप्तोऽथ[6]जानकिः ॥

इति । दामन्यादिभ्यस्तावत् – दामनीयः, दामनीयौ, दामनयः । [7]औलपीयः, औलपीयौ, उलपयः । त्रिगर्तषष्ठेभ्यः खल्वपि – कौण्डोपरथीयः, कौण्डोपरथीयौ, कौण्डोपरथाः । [8]दाण्डकीयः, दाण्डकीयौ, दाण्डकयः । क्रौष्टकीयः । जालमानीयः । ब्रह्मगुप्तीयः । [9]जानकीयः ।

दामनी । [10]औलपि । [11]आकिदन्ती । काकरन्ति । काकदन्ति । शत्रुन्तपि । सार्वसेनि । बिन्दु । मौञ्जायन । उलभ । सावित्रीपुत्र । दामन्यादिः ॥

## पर्श्वादियौधेयादिभ्यामणञौ । (११७/२०७०)

आयुधजीविसङ्घात् इत्येव । पर्श्वादिभ्यः यौधेयादिभ्यश्च प्रातिपदिकेभ्यः आयुधजीविसङ्घवाचिभ्यः स्वार्थेऽणञौ प्रत्ययौ भवतः । पार्शवः, पर्शवौ, पार्शवः । आसुरः, आसुरौ, असुराः । यौधेयः । शौक्रेयः ।

पर्शु । असुर । रक्षस् । बाह्लीक । वयस् । मरुत् । दशार्ह । पिशाच । विशाल । अशनि । कार्षापण । सत्वत् । वसु । पर्श्वादिः ।

यौधेय । कौशेय । क्रौशेय । शौक्रेय । शौभ्रेय । धार्तेय । वार्तेय । जाबालेय । त्रिगर्त । भरत । उशीनर । यौधेयादिः ॥

## अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् । (११८/२०७१)

आयुधजीविसङ्घात् इति निवृत्तम् । अभिजिदादिभ्योऽणन्तेभ्यः [12]प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति ।

---

1. आयुधजीविसङ्घवाचिनः ङ. 2. वार्केणी स्त्री इत्यधिकम् क. 3. आयुधजीविसङ्घग्रहणम् ङ. 4. किम् इत्यधिकम् क. 5. च नास्ति फ, तत्र च क. 6. जालिकः क. 7. तैपलीयः तैलपीयौ तैलपयः क. 8. एवं इत्यधिकम् क. 9. जालकीयः क. 10. तैलपि क. 11. वैजवापि, औदंकि, अच्युतति, अच्युतदन्ति, शाकुन्तकि, औडवि आविदन्ति कदन्तकि इत्यधिकम् ङ. 12. प्रातिपादिकेभ्यः नास्ति ह.